श्रीरामरसायनम्

प्रणेता :—
लछमणसिंहः अग्रवालः (लक्ष्मणः)

श्रीरामरसायनम्

प्रणेता :—
लछमणसिंहः अग्रवालः (लक्ष्मणः)

सर्वाधिकाराः सुरक्षिताः

卐

प्रथमम् संस्करणम्
दिसम्बर 1987

卐

मूल्यम् :
दशरूप्यकाणि

प्रस्तुता रचना

श्रीरामरसायनम् नाम नूतनेयं रचना 2043 तमे विक्रम सम्वत्सरे कार्तिकमासि समीपवर्तिनि सीता-राममन्दिरे प्रत्यहं प्रातर्वाच्यमानां "पतित-पावनसीताराम" इति 108 पद्यमयीं हिन्दी-रचनां कामपि श्रावं श्रावं मनसि मे प्रादुरासीत्। अत्र रामकथा वियोगिनी-मुख्येषु वृत्तेषु निबद्धेषु 355 पद्येषु वर्णिता विराजते। कृतौ यदपि काव्यसौष्ठवं केनाप्यनुभूयेत, तत् कृत्स्नं रामचरितस्य नैसर्गिकसौन्दर्यस्यैव फलं स्वाभाविकम्, यतो नात्र किमपि वचन-रचनाचातुर्यं, नापि गुणालङ्कारयोजना, न च कथोपकथनविस्तरः, केवलमुपदेशविवर्जिता कथा रसधारां वाहं वाहमग्रतोऽनुधावति। उपसंहारे कुशवाहान्, लववंशजांश्च बप्पारावलसंग्रामसिंहमहाराणा-प्रतापशिवराजप्रभृतींश्च राष्ट्रवीरानुल्लिखता मया कथातन्तुरद्यतन-कालमानीतः। तादृशो राष्ट्रपूर्वजस्य भगवतः श्रीरामचन्द्रस्यै-तिहासिकत्वं को नु खलु शङ्कते विना दुराग्रहिणं विद्वेषिणम्। अत्र कर्नलटाडकृतो राजस्थानेतिहासः प्रमाणम्। कृत्स्नेऽपि भारतीये वाङ्मये रामकाव्यं चारुतरं वृहदुद्यानमिव विराजते। सौगन्धिके तस्मिन् वने श्रीरामरसायनम् नवारोपित इव लघुपोतकः सहृदयानामानन्दकरः सेत्स्यतीति समाशंसे। सर्वे वयं रामकृपाभाग-भाजो भूयास्म, इति प्रज्ञाचक्षुषो जनस्यास्य मङ्गलाशीः।

विदुषां वशंवदः
लछमनसिंहः अग्रवालः (लक्ष्मणः)

शुद्धिपत्रम्

पृष्ठ सं०	श्लोक सं०	अशुद्धिः	शुद्धिः
12	45	प्रतिबोधय...	प्रतिबोध्य..
14	68	नित्यषो	नित्यशो
16	16	पृतनाभिवि...	पृतनाभिवि..
21	22	सखिडिषम्	सखिद्विषम्
23	13	द्विरदं	द्विरदं
25	37	स्फुट	स्फुटं
36	58	प्रशासत	प्रशासतः

अन्या अपि तथाविधा मुद्रणत्रुटयः शोधनीयाः ।

THE AUTHOR

Lachhman Singh Aggarwal was born on October 11, 1938 (wrongly registered as 12-5-39 at school), a son of Shrimati Dropadi Devi and Shri Shiam Sunder Aggarwal, at village Jharsaintly about 3 Kms from Ballabgarh located in District Faridabad of Haryana. A born victim of various fevers, smallpox, indigestion, short sight and general debility and brought up in utter want and poverty, he suffered from gradual loss of vision till in 1957, he became blind enough to be disabled from reading and writing while he was still at college preparing for his intermediate examination, which he managed to pass as a blind candidate. Against all this debacle God had been kind enough to bless him with exceptional intelligence and exquisite memory which helped him win scholarships and earn a name in society. After passing his intermediate examination, he came in contact with the village temple where he learnt about the old Hindu Scriptures aspecially the Vedanta Philosophy. It was here in 1965 that he came by the art of writing Samskrit poetry just by a stroke of Fortune. A learned ascetic, who was a great admirer of the author, one day, invited his attention to a crooked and grammatically incorrect stanza composed by a young ascetic, with whom he (the ascetic) was not on good terms. This incident set Aggarwal's mind working and within a week he was able to compose The Prabhat-Shatakam which was published in 1970 and later improved on and brought out with the title "The Rashtra Darpanah" in 1980

In 1959, L. S. Aggarwal started some tuition work. privately teaching Middle and High School students at Ballabgarh. Teaching and learning from them, he was able to get his M.A. in Samskrit in 1973, standing third in the Panjab University. All the while his stomach remained his deadly enemy quite in league with the poverty and want that he had inherited from his parents. God, however, endowed him with power to push ahead through the world and he was able to write and publish 'Kalratrih' 'Rashtra-Darpanah', 'Vignan Gitam', 'Kutumbini', 'Padya Pushpa Vatika', 'Dhatu-Vivartah', and 'Kal-Chakram' in 1977 80, 81 82, 83, 84 and 86 respectively. Out of these the third, the fourth and the fifth publications were able to win the Haryana Sahitya Academy Awards for 82, 84 and 85. The sixth of these books brings out the role of Samskrit roots in the formation of English language whereas all others are poetic works dealing with the present day conditions in the country and the world. All this literature, like the author himshelf, has its roots seated deep in Indian soil and represents a combination of the old and the new, the East and the West. At present Aggarwal lives at 54/1, Sihi Gate, Ballabgarh, Distt. Faridabad (121004) earning his living through the same profession i.e. teaching English and other subjects to High school and college students.

L. S. Aggarwal

ॐ

श्रीरामरसायनम्

प्रथमः सर्गः

नत्वा श्रीरामचन्द्रस्य, पादपद्मं भवापहम् ।
क्रियते मञ्जु मङ्गल्यं, रामगाथारसायनम् ॥1॥

दशकन्धरपापकर्मभिर्नितरां पीडितकाश्यपी पुरा ।
परमेष्ठिनिकेतने सुरैः, शरणं प्राप हरिं मधुद्विषम् ॥2॥

शरणागतभक्तवत्सल, भवदुःखत्रयमोचन प्रभो ।
खरराक्षसवंशतापितान्, सुरसंरक्षक रक्ष बान्धवान् ॥3॥

भगवन्नुपकारसंततिं, तव को विस्मर्तीह देहभृत् ।
जठरे तमसावृते भवानविता नाम जनस्य केशव ॥4॥

किमिहास्त्यहितं हितं च नो, भगवन् वेत्ति भवान्न तद्वयम् ।
जगदीश समर्थ पालय, नतवैधेयजनं स्वकं हरे ॥5॥

स निशम्य वचोऽतिपेशलम्, करुणार्द्रः कलया नभोगिरा ।
भवितास्मि रघोः कुलेऽचिरात्, सदने पङ्क्तिरथस्य घुष्टवान् ॥6॥

इति वाचमिमां सुखावहाम्, भयहां संशयशोकनाशिनीम् ।
अवधार्य सुरा अजो धरा, प्रभुजन्मक्षणमभ्यपालयन् ॥7॥

अनपत्यतया रघूद्वहो, नृपतिः पङ्क्तिरथः प्रतापवान् ।
तनयाप्तिफलाध्वरं शुभमृषिजामातृकरेण कारयन् ॥8॥

परितृप्तहिरण्यरेतसा, प्रतिदत्तस्य चरोः प्रभावतः ।
महिषीत्रयमात्मनः कृती, धृतगर्भं मुदितो व्यलोकयत् ॥9॥

मधुमासि दिने शुभे सुदि, नवमे पावनयोगलग्नके ।
वसुधां बहुधन्यतां नयन्, जगदात्मा जगतीमवातरत् ॥10॥

प्रकृतिः प्रससाद सर्वतः, पवमानः सुभगः शनैर्ववौ ।
ननृतुः सुरसुन्दरीगणा, अनदन् दुन्दुभयो नभस्तले ॥11॥

नृपतेर्भवनं समन्ततः, परमानन्दनिकेतनं महैः ।
शुशुभेऽर्थिजनाननर्थिनो, विदधद् दानशिरोमणिर्बभौ ॥12॥

कौशल्यानन्दनं रामं कैकेय्या भरतं तथा ।
सौमित्री च गुरुश्चक्रे लक्ष्मणं रिपुसूदनम् ॥13॥

वियता समयेन विश्वसूः, प्रभुरामोऽवरजैः समं गतः ।
पितृलालितपालितार्भकः, शिशुलीलां रुचिरां चरन् भृतिम् ॥14॥

वयसा परिवृत्तसौष्ठवं, मुखमिन्दुच्छविनिन्दकं त्रिभोः ।
पितराववलोक्य जग्मतुर्नवलं प्रेम मुदं क्षणे क्षणे ॥15॥

गुणनिर्जितलोकहृत्तलः, प्रणिपातैर्वचनामृतेन च ।
सहजातकसौहृदं महदवलोकेन हसेन सोऽतनोत् ॥16॥

विपिने मृगयां प्रकृत्य ते, सुकुमारा बलिनः किशोरकाः ।
हतपुण्यमृगान् दिवंगतान्, गुरवे भूपतये न्यवेदयन् ॥17॥

अथ गाधिसुतो महामुनिर्विपिने राक्षसवृन्दवेजितः ।
नगरीं प्रभुरामलक्ष्मणौ, प्रतिपेदे नृपतिं यियाचिषुः ॥18॥

परविह्वलता महीभृतो, जनिता रामवियोगवार्तया ।
गुरुणा प्रतिबोधमापितस्तनयौ प्रेषितवान् यथा तथा ॥19॥

इषुचापधरौ महाबलौ, मुनिना संगरवर्कुरौ गतौ ।
पथि दस्युपतिं स ताटकाम्, प्रभुरेकेन जघान पत्रिणा ॥20॥

मखरक्षणतत्परौ तदा, न्यहतांसानुचरं सुबाहुकम् ।
फलहीनशरेण राघवः, खलमारीचमपास्थदाहवात् ।।21।।

एवं निष्कण्टकं कृत्वा राजर्षिं तौ सहामुना ।
मिथिलायै प्रतस्थाते द्रष्टुं सीतास्वयम्वरम् ।।22।।

विजनो ददृशे स आश्रम, ऋषिपत्नी पथि यत्र सा शिला ।
चरणाम्बुजपांसुपाविता, शमहिल्या गमिता तपस्विनी ।।23।।

अथ जह्नुसुतामघापहाम्, समतीत्यर्षिकथाप्रसादितौ ।
ददतौ फलमच्युतौ दृशाम्, पथिनृणां मिथिलां समाप्नुताम् ।।24।।

गुणरूपबलेन रोचिषा, विवशीकृत्य पुरं विजह्रतुः ।
नवलां नवलां क्षणे क्षणे, जनयन्तौ च मुदं समीक्षितुः ।।25।।

मिथिलानगरी निवासिनो, वररामं रतिमारमोहनम् ।
सममंसत जानकीवरमुचितं चेष्टसुरानपूपुजन् ।।26।।

कुसुमावचयाय निर्गतं वरणीराममपश्यदुत्तमा ।
उभयोर्मनसोः पुरातनी, परमा प्रीतिरसौ समस्फुरत् ।।27।।

गुरुणा सार्धमापन्नः स्वयम्वरस्थलं हरिः ।
सानुजः स्वेन भावेन वीक्षितो विविधैर्जनैः ।।28।।

जह्नुसुताः सुजनाः सुमेधसो, वनजानीव रवौ चकासति ।
जनकः सकलत्रबान्धवः, स्वजनं स्निग्धतरं स्म मन्यते ।।29।।

वरणीमभिलिप्सवो नृपा, उरुमानेन समिद्धचेतसः ।
युवकं परमं भयावहम्, प्रतियोधं नितरामजानत ।।30।।

अचिराज्जनकस्य चारणाः, प्रणमुच्चैर्जुघुर्विशाम्पतेः ।
त्रिपुरारिधनुः सुकर्कशं, लभते खण्डयिता विदेहजाम् ॥31॥

प्रणघोषणया समीरितैर्यतितं नैकविधं महारथैः ।
अचलन्न धनुः परं गुरु, हततेजोबलकीर्तयोऽचलन् ॥32॥

अवलोक्य स शोकविह्वलो, नृपतिर्योगिपुरोगमो महान् ।
सुभटैः रहिताद्य कुम्भिनी, कथयित्वा बलिलोकमक्षिपत् ॥33॥

दुहिता दयिता सुखोचिता, प्रणतो मे न विवाहिता ननु ।
सुकृती विजहानि किं प्रणम्, विधिना नो रमणः प्रकल्पितः ॥34॥

क्षितिपस्य गिरं निशम्य ताम्, करुणाक्षोभसमन्वितां सभा ।
अनुशोच्य नृपात्मजां शुभाम्, भृशमुद्विग्नमना अदूयत ॥35॥

सर्वराजन्यलोकस्य मानभङ्गं वचस्तु तत् ।
श्रुत्वा राजसमज्यायां बभाषे लक्ष्मणो रुषा ॥36॥

रघुवंशशिरोमणिर्महाभटरामोऽत्र विराजते स्वयम् ।
उचितं भणितं न भूभृता, किमिदं जीर्णधनुः पिनाकिनः ॥37॥

यदि राम भवान् समादिशेद्, बृहदण्डं घटतुल्यमाददे ।
त्रुटिमाकलयामि नालवद्, गिरिशस्यात्र शरासनं त्विदम् ॥38॥

वचनं बलपौरुषान्वितम्, ह्रियमाधान्नृपतेर्मुदं न न ।
उदतिष्ठदनुज्ञया गुरोः, रघुवीरः प्रतिपक्षघस्मरः ॥39॥

मृगराजगतिर्व्रजन् युवा, जननेत्रैः स्तिमितैर्विलोकितः ।
सहसोदहरन्महाधनुः, क्षणमात्रेण कथां समापिपत् ॥40॥

अधुरच्च कटुर्महाध्वनिर्धनुषो भङ्गकृतो नभस्तले ।
मुदिता वरणी च तत्कुलम्, जयशब्दं समुवाच सज्जनः ।।41।।

मिथिलेशपुरोधसा तदा, समनुज्ञातपतिम्वरा वधूः ।
सहगीतसखीजना ह्रियम्, भजमाना वरमालयाऽचलत् ।।42।।

हृदि मोदमपारमागता, शनकैः रामसकाशमासदत् ।
करयुग्मसरोजकम्पिताम्, जयमालामकरोद् गले शुभाम् ।।43।।

पौरुषेण युता भूतिः सन्तो हर्षमुपाययुः ।
चुक्षुभे द्विषतां चेतो यत्र तत्र प्रलापिनाम् ।।44।।

अथ मोदमये क्षणे तदा, द्विजरामः परशुं दधच्छितम् ।
त्रिपुरारिधनुर्विनाशतः, कुपितस्तत्र समाययौ ज्वलन् ।।45।।

निकषं भटमानिनाममुम्, खलराजा अवलोक्य तत्रसुः ।
सुखमानशिरे विचार्य ताम्, विपदं रामकृते समागताम् ।।46।।

परशुं खरधारमुत्क्षिपन्, समपृच्छत् तुडिता कुहास्ति कः ।
पृथगेतु विहाय संसदम्, भवतां चेदधुना जिजीविषा ।।47।।

इति दर्पमयीं गिरं स ताम्, सहमानो न मनस्विलक्ष्मणः ।
निजगाद मुने कृतं रुषा, गलितं जीर्णमदो धनुः स्वयम् ।।48।।

अयि बालक बुध्यसे न माम्, शमनं क्षत्रकुलस्य विश्रुतम् ।
गिरिशस्य शरासनं महत्, कटुवादी लघयस्यवद्यधीः ।।49।।

विरराम न लक्ष्मणो न स, वचनादन्यवचोऽसृजद्रुषम् ।
कलहं शमयन्नथो प्रभुर्मधुरां वाचमुवाच राघवः ।।50।।

जन एष गुरोऽत्र तिष्ठति, भवतां कोपकृपादिभाजनम् ।
चपलप्रकृतिर्वयोबलात्, क्षमणीयः शिशुरेष नाथ ते ।।51।।

विनयेन नता हि सर्वदा, द्विजवर्या रविवंशजन्मभिः ।
गुणबाहुलकात् सतां नतिर्बलिनः कस्य नता रघूद्वहाः ।।52।।

इति रामवचोऽवबोधितो, जमदग्नेस्तनयः प्रतापवान् ।
धनुरन्यतरत्समर्पयन्, कथयामास विकर्ष राम तत् ।।53।।

अनायासनतं चापं रामपाणौ विलोक्य सः ।
विस्मितः सन् गृणन् प्रेम्णा प्रतीतः काननं गतः ।।54।।

विलयं व्यसनस्य पश्यता, जनकेनाथ पुरोधसो धिया ।
प्रहिताः पटुलेखहारका, अवधेशस्य पुरीमनन्दयन् ।।55।।

अवधिः परमोत्सवस्य स, सुकृती भूमिपतिः सबान्धवः ।
जनकैर्मुदितैर्यथाविधि, प्रतिपन्नो मिथिलां सभाजितः ।।56।।

तनयाववलोक्य सोदयौ, हृदये मोदमपारमावहत् ।
भरतो रिपुहापि सोदरौ, मिलितौ प्रेमरसे ममज्जतुः ।।57।।

रसकौतुकहर्षनिर्भरम्, क्षितिजारामविवाहमङ्गलम् ।
मिथिलापुरवासिनां कृते, महतो मुक्तिसुखात् समुच्छ्रितम् ।।58।।

इतरेऽपि कुमारपुङ्गवाः, कृतिसम्बन्धिमनोऽनुराधिना ।
सुकृता जनकेन नन्दिनीत्रयपाणीननुदाय मानिताः ।।59।।

वरलक्ष्मण ऊर्मिलां शुभामुपयेमे भरतश्च माण्डवीम् ।
अवरा कुशकेतुकन्यका, श्रुतिकीर्तीरिपुहृत्नवे ददे ।।60।।

तनयांश्चतुरो वधूयुतान् सुकृती पङ्क्तिरथो विलोकयन् ।
स्वमबुध्यत केवलात्मजात्, कृतिनं वासवतोऽपि रामसूः ।।61।।

श्वशुरायतनाय जानकीम्, भगिनीभिः सहितां विसर्जयन् ।
स विदेहनृपः सदेहताम्, करुणाक्लिन्नमनाः समैधत ।।62।।

नमता नवलानुबन्धिना, ह्यवधेशोऽनुमतो न वाञ्छता ।
ससमाजवधूवरान्वितः, पुरमायाद् रमणीयकल्पनाम् ।।63।।

इह विधुवदनीर्वधूर्मनोज्ञाः,
पुलकितवाग्बहुमोदनिर्भराङ्गम् ।
नरपतिसहधर्मिणीकुलं तत्,
कुलविधिनाऽभिननन्द सद्मलक्ष्मीः ।।64।।

इति प्रथमः सर्गः

द्वितीयः सर्गः

आ विवाहात् कुमाराणां वर्धमाना सुखैर्महैः ।
नूत्नं जीवनमारेभे पुरी दशरथस्य सा ।।1।।

सततं वररामकर्मभीरघुपौत्रो मुदितो जनैः सह ।
अधिकाधिकयोगमाप्नुवन्, विषये शासनकार्यमाचरत् ।।2।।

युवराजपदं स्म दित्सति, नृपतिः शस्तगुणाय सूनवे ।
स्वपुरोहितशोधितं शुभमभिषेकाय दिनं व्यजिज्ञपत् ।।3।।

जननी भरतस्य भूपतेर्नृपकैकेयसुता प्रिया लघुः ।
प्रियसेविकया प्रचोदिता, रमणं प्रार्थयितुं वरौ निजौ ।।4।।

भवितव्यतया हितैषिणीम्, कुटिलां मन्थरिकाममन्यत ।
प्रियरामगुणापि साऽलुठत, हठिनी कोपगृहे विभूषणा ।।5।।

निशि भूमिपतिर्यदाऽमिलद्, भवने कोपकलाविवर्णिताम् ।
भुजगी श्वसतीव भीषणा, शपथं प्राप्य मनीषितं जगौ ।।6।।

भुवनं भरतो भुनक्तु मे, तव रामः शरदश्चतुर्दश ।
निवसेद्विपिने वरद्वयम्, मम याचे स निशम्य सन्नधीः ।।7।।

शतधाऽनुनयः क्षमाभृता, प्रकृतो रामविवासहापने ।
हठयोगबला त्रिया परम्, जयिनं शस्त्रततेः पराजयत् ।।8।।

रघुवंशपरम्परा शुभा, ह्यसुभङ्गेऽपि निजप्रतिश्रुतेः ।
अवहेलनया कृतं नृपः, कथयित्वा पतितः शुचा भुवि ।।9।।

दुःखितं मलिनं दीनं, मूर्ति दृष्ट्वा शुचः पतिम् ।
न विब्बोकगताराज्ञी मात्रया पर्यतप्यत ।।10।।

विलपन् रघुवीरनाम स रजनीं तां विनिनाय विह्वलः ।
सचिवैर्विदितं मुखान्मुखम्, पुरि कौलीनमिदं समाचरत् ॥11॥

अभिषेकरसोत्कमानसा, मलिनास्या जनता व्यदूयत ।
ददृशे नगरी महोत्सवा, वनिका वज्रनिपातसंभ्रमा ॥12॥

न शशाक नृपस्तु भाषितुम्, महिषी राममसूचयत् स्थितिम् ।
न विभुर्विषसाद वार्तया, न मुखश्रीर्मलिनायिता मनाक् ॥13॥

अनृणं जनकं विधित्सुना, सुभगोऽरण्यनिवास ऊहितः ।
चरणावभिवाद्य सान्त्वयन्, पितरं मातृसमीपमागमत् ॥14॥

हतभाग्यविपाकवञ्चिता, जननी नैकविधं प्रबोधिता ।
बहुधीरतया निसर्गतो, गुरु सेहे व्यसनं मनस्विनी ॥15॥

विदितां जनकात्मजां सह, वनयानाय कृताग्रहां सतीम् ।
विविधं समबोधयद् गृहे, वसनायापि च मातृशान्तये ॥16॥

कटुतिक्तफलाशनं वनम्, हिमवर्षातपवातदुस्सहम् ।
बहुदारुणसत्त्वभीतिमद्, नरनारीहरराक्षसाकुलम् ॥17॥

मृदुगात्रि विचार्य कश्मलम्, वनवासेन कृतं पटीयसि ।
इति सामवचो निशम्य सा, हिमशीर्णा नलिनीव विव्यथे ॥18॥

बुबुधे सहधर्मचारिणी पतिसङ्गं निरयेऽपि सम्मतम् ।
अपि गन्तुमुरीकृताऽम्बया, मुमुदे रामसभाजिता शुभा ॥19॥

स च रामपदैकसंश्रया, प्रणयी शैशववन्धुलक्ष्मणः ।
विकलश्चलितुं समुद्यतो, जननीदिष्टिमवाप्य संगतः ॥20॥

इति वल्लभयाऽनुजेनस, मुनिवेशं परिधाय शार्ङ्गधृत् ।
जननीं जनकं प्रणम्य च, गुरुमापृच्छ्य वनाय निर्गतः ।।21।।

न विना प्रभुणा पुरी पुरी; दिवसं तत्र न यत्र नार्यमा ।
पुरवासिजनो विचारयन्, सह रामेण चचाल वत्सलः ।।22।।

प्रेरितेन रथं राज्ञा, सुमन्त्रेण प्रवाहितम् ।
आरुरोह महाबाहुर्वैदेह्या लक्ष्मणेन च ।।23।।

निशि सुप्तजनं स वर्त्मनि, विजहत्सूतममात्यमादिशत् ।
सुकृतिन् रथचक्रपद्धतिर्न विचीयेत तथा प्रवाहय ।।24।।

न विलोक्य विभुं निशात्यये, नगरीं पौरजनो गतः शुचा ।
अमिलद् बिबुधापगातटे, गुहराजं सुहृदं वहन् महान् ।।25।।

प्रभुपादसरोजपांसुभिर्विहिता स्त्री कठिना शिला श्रुता ।
मम दारुमयी भवेन्न नौर्युवतिः केवट इत्यशङ्कत ।।26।।

अपि लक्ष्मण एष मां शरैः प्रतिहिंस्यात् सहतामुताथवा ।
न हि पारयितास्मि जाह्नवीम् प्रभुमक्षालितपादपङ्कजम् ।।27।।

इति भावभरां निशम्य गाम्, सुभगां व्याजविवर्जितामसौ ।
सविहासमवोचदच्युतः कुरु नौस्ते न युवायते यथा ।।28।।

अथ धौतपदाम्बुजः प्रभुः, सुकृता धीवरकेण धीमता ।
शुचिदेवधुनिं लिलङ्घिषु, स्तरणीमस्य विवेश सान्वयः ।।29।।

विरुदत्सचिवं गृहं प्रति, व्यसृजत् क्लिन्नहृदा यथा तथा ।
भवतारणनामकीर्तनम्, मनुजो देवनदीमतीतरत् ।।30।।

रुचमध्ववनस्य रोचयदबलालोकमनांसि रञ्जयत् ।
*मुनिमादिकवि च मानयत्; त्रितयं चित्रगिरिं समागतम् ।।31।।

उटजं कलरामणीयकमकृतावासकृते सलक्ष्मणः ।
मुनिभिर्वनवासिजातिभिर्मुदितं रामसमागमादलम् ।।32।।

प्रकृतिर्भगवन्तमागतमवलोक्याशु ससर्ज सम्पदम् ।
कुसुमैरलसन् फलैर्द्रुमाः, कलरोलम्बकदम्बचुम्बिताः ।।33।।

नवपल्लवशोभितं वनं, विरराजे द्विजवृन्दकूजितम् ।
विजहूरिपुतां विरोधिनो, ह्यमृतानूनजला जलाशयाः ।।34।।

एवं मूलं फलं खादन्, वल्कलं धारयन् प्रभुः ।
सेव्यमानोऽनिशं भ्रात्रा, चित्रकूटे व्यराजत ।।35।।

स निवृत्य सुरापगातटात्, सचिवो राजपुरीं विषण्णधीः ।
उपसद्य निशान्त ईश्वरम्, मणिहाने फणिनं व्यलोकयत् ।।36।।

वदनस्य विवर्णरूपता; निखिलं वृत्तमचीकथत् प्रभोः ।
रघुनन्दन राम जीवित, कुह यातोऽसि पपात कौ नृपः ।।37।।

जननी मृदुवाग्जगद्गुरोः, ससुमन्त्रा समबूबुधत् पतिम् ।
परमाधिविलुप्तचेतनः, स रटन् राम! कलेवरं जहौ ।।38।।

विररास जनः समन्ततो, महिषीलोकविलापभैरवम् ।
धनधान्यभरेण पूरितम्, भवनं प्रेतनिकेतनोपमम् ।।39।।

रघुवंशपुरोहितो मुनिर्नगरीं प्रेक्ष्य विना प्रशासकम् ।
भरतानयनाय धावकान्, लघु मातामहवेश्मनेऽनुदत् ।।40।।

---

* भरद्वाजम्

भरतो विमनाः समागतः, शसितां वीक्ष्य पुरीं तथाविधाम् ।
कृतमातृविगर्हणो रुषा; विधिना प्रेतकृतिं समाचरत् ॥41॥

पितृराज्यकृते निवेदितो, गुरुणा नीतिविदाम्वरेण सः ।
विधिकालगतानि निन्दता, चिखिदे दाशरथिः शुचिव्रतः ॥42॥

प्रभवे सविता पिता कृती, स्वजनौ सोदररामलक्ष्मणौ ।
जननी जननीसका गुरो कथयित्वा भरतेन चुक्रुशे ॥43॥

कुमारेण समं कृत्स्नाः; सभा चुक्रोश विह्वला ।
तदीया वारिधाराऽभूल्लोकशंकामलापहा ॥44॥

अभिभूतमना मुनिर्वशी, प्रतिबोधयामुमनेकधाऽभणत् ।
अभिधत्स्व चिकीर्षितं निजं, सुकृतिन् तत्करणीयमेव नः ॥45॥

सह यातु पुरी मया वनमनघं भ्रातरमीश्वरं भुवः ।
अभिरामम्ते न कोऽपि ना, मम चेतःपरितापखेदहा ॥46॥

इति वाचममुष्य सा सभा, चकमे रामविलोकनोत्सुका ।
गुरुसंस्तुतबन्धुमातरः, सहकैकेयसुताः प्रतस्थिरे ॥47॥

अमिलत् पदगो व्रतं दिशन्, गुहराजं प्रियमग्रजस्य तम् ।
शयितं स्थितमस्य भावुको, गुहनिर्दिष्टमवन्दताश्रुमान् ॥48॥

प्रतिपद्य चलन् रघूद्वहः, स भरद्वाजमुनेः सदाश्रमम् ।
मुनितीर्थपती शुभाशिषौ, नतवांश्चित्रगिरिं समाययौ ॥49॥

पदयोर्निपपात दण्डवद्, भगवन् पाहि जनं नतार्तिहन् ।
कथयन्तमिमं महामना, हृदये साश्रुकलो न्यवेशयत् ॥50॥

प्रभुणा रुदताऽनुजो रुदन् सहहार्दं परिषस्वजे चिरम् ।
जनता विनिचाय्य सौहृदम्, बुबुधे नात्मगतिं परिप्लुता ।।51।।

करुणातरलो गिरिस्तदा, सुहृदां मेलनरोदनाप्लुतः ।
स्निहितिस्फुटरोदनादलम्, लघिमानं हृदयानि भेजिरे ।।52।।

तदा ज्ञात्वा दिवं यातं, पितरं पुत्रवत्सलम् ।
विह्वलं रुदितो रामो ददावस्मै तिलाञ्जलिम् ।।53।।

मिथिलाधिपतिर्विदेहराड्, विदितश्चित्रगिरिं समाययौ ।
धृतवल्कलिकां सुतां द्रुतः प्रशशंसोभयवंशसत्क्रियाम् ।।54।।

अथ लोकसभामितः प्रभुर्गुरुपादावभिवाद्य कृत्यवित् ।
भरतस्य मनो विचारयन्, भरतेच्छा भवितेत्यभाषत ।।55।।

अमरेन्द्रनिकेतनं नृपो, वचनं स्वं परिपालयन्नयात् ।
विपिनाद् विनिवर्तनं मम, भवितास्य प्रतिकूलमुद्गतेः ।।56।।

अभिभूतमनाः कृताञ्जलिरुदतिष्ठद् भरतः सहाश्रुभिः ।
शिशुरस्मि न वेद्मि किं हितम्, विनियोज्योऽस्मि गुरो
स्वकर्मसु ।।57।।

अभिषेकभरा इमे मया, सह तिष्ठन्ति पुरोधसो मतात् ।
उपयुज्य यथामतं प्रभो, कृतकृत्यो भरतो विधीयताम् ।।58।।

अथ राममतेन सद्भुवमृषिरत्रिर्भरतं वनेऽनयत् ।
इह तीर्थपयोविसर्जनाच्छुचिकूपं भरतान्धुमूचिरे ।।59।।

चलता भरतेन याचितः, कृपयाऽदत्त विभुः स पादुके ।
अनुशाधि जनं चतुर्दश, शरदो न्यायपथेन चादिशत् ।।60।।

विनयेन नतः प्रसन्नधीः; प्रतिजग्राह पुनीतपादुके ।
गुरवे प्रभुणा समर्पितः, सहसार्थो गमितस्ततोऽनघः ।।61।।

अयोध्यां प्राप्तवानेष, रामपादप्रसादकः ।
सिंहासनेऽकरोत् पादौ पावनाहे प्रशासकः ।।62।।

दिवसे दिवसे स पादुके, प्रतिसंपृच्छ्य चकार शासनम् ।
युवकस्य मदो न चापलम्, सततं चिन्तयतः पदं हरेः ।।63।।

विजपन् प्रभुनाम जिह्वया, सहरोमाञ्चकलेन वर्ष्मणा ।
उदितास्रुसमाकुलेक्षणो, दिशति स्म व्रतिनामपि व्रतम् ।।64।।

मुनिवेशमधारयद् वशी, प्रभुदुःखासिकया निकृत्तधीः ।
गुरुसेवकधर्मवाहकः, कृतगर्तः शयनं व्यधादधः ।।65।।

भवनेऽखिलभोगसंयुते, गतरागं भरतस्य मानसम् ।
इति दाशरथी अमू समम् कृतवन्तौ सदने वने तपः ।।66।।

पुरवासिजनो नृपात्मजौ, सहभार्यौ गुणिनौ तदूर्मिला ।
तनुतां वपुषः प्रपेदिरे, तपसाऽशेषपुरी तपोवनम् ।।67।।

अवधिं गणयन्ति नित्यषो, विरहं नूत्नयति स्म संस्मृतिः ।
पदपङ्कजदर्शनार्थिनो, बहुदा चित्रगिरीनतो ययुः ।।68।।

अनुजजनकपुत्रीसंगतस्तीर्थकीर्तिः,
पुरजनमुनिवृन्दैः प्रायशो गम्यमानः ।
शिशुवच इव तातो भिल्लवाक्यानि शृण्वन्,
बहुतिथमवधिं शं रामदेवो निनाय ।।69।।

इति द्वितीयः सर्गः

अथ तृतीयः सर्गः

जनसम्पर्कबाहुल्यादुद्विग्नो रघुनन्दनः ।
चित्रकूटान्मतिं चक्रे प्रस्थातुं काननान्तरम् ॥1॥

सनिषङ्गधनुर्भृताम्वरौ, सहसीतौ चलितौ गिरेस्ततः ।
जलदा विदधुर्निरातपम्, मरुतः शान्तसुखावहा ववुः ॥2॥

वरदाऽत्रिवशा विदेहजाममसूया गृहधर्ममादिशत् ।
निधनं च विराध आप्तवान् रघुनाथे वनमन्यदीयुषि ॥3॥

शरभङ्गसुतीक्ष्णकुम्भजा मुनयश्चापि कृतार्थतां ययुः ।
अभयं विदधत्सतां युवा प्रतिशुश्राव वधं सुरद्रुहाम् ॥4॥

कतिचिद् दिवसानि कुम्भजैः, सह नीत्वा प्रतिपादितायुधः ।
अधिपञ्चवटि व्रजंस्तत, उपगोदावरि निर्ममे कुटीम् ॥5॥

अशनं वनजं फलादिकम् शयनं भूमितले वितर्दने ।
इति कृच्छ्रमयी वनेस्थितिः, सुहृदां नो त्रितयस्य कष्टकृत् ॥6॥

हसतां लपतां परस्परम्, प्रकृतेर्भीममनोज्ञवैभवम् ।
अवलोकयतां खगान् मगान्, कतिचित् कालकला सुखं
व्यगात् ॥7॥

अनुजे फलमूलभोजनाचितयेऽरण्यमथावगाहिते ।
क्षितिजां स विराड् हुताशने, कतिचित् कालकलां
वसाब्रवीत् ॥8॥

तदनु प्रतिमूर्तिमात्मनः, सदृशीं तत्र विहाय जानकी ।
प्रविवेश रमाऽऽशुशुक्षणिम्, बुबुधे वत्तम्दिं न चानुजः ॥9॥

अथसूर्पणखा निशाचरी, जनसंस्थाननिवासिनी यदा ।
उपपञ्चवटि स्म हिण्डते, विनिशाम्य प्रभुरूपमद्भुतम् ॥10॥

विवशा मथितेन चेतसा, परिणेतुं रघुवीरमाभणत् ।
प्रहिता प्रभुणाऽनुजाय सा, ह्यनुजेनापि पुनश्च शार्ङ्गिणे ।।11।।

प्रचुकोप तिरस्कृता तथा, पदविद्धा क्षुभितेव पन्नगी ।
जनकस्य सुतामतित्वरत्, प्रकटय्याति भयङ्करीं स्थितिम् ।।12।।

इङ्गितं प्राप्य रामस्य प्रवीणो लक्ष्मणस्तदा ।
चकर्त श्रवणौ नासां लङ्केशं तर्जयन्निव ।।13।।

अवकृत्तिनिकारमूर्च्छिता, विकला क्षेत्रियदण्डदण्डिता ।
रुदतीरुधिरेण संप्लुता, खरमुख्यान् निजबान्धवानयात् ।।14।।

गृहणीं सुरिरक्षिषुः पतिरनुजेनाशु गुहामवीविशत् ।
सनिषङ्ग धनुर्धरो रिपून्, प्रतिपश्यन् समराय नद्धवान् ।।15।।

अचिरात् खरदूषणादयः, पृतनाभिविपुलाभिरापतन् ।
परिघैर्विशिखैश्च तोमरैर्ववृषुस्तं युगपत् समन्ततः ।।16।।

प्रमदां प्रतिदेहि बालक, प्रतिपद्यस्व गृहं च जीवितः ।
इति रामसुरूपभावितौ, समयं तस्य खरौ शशंसतुः ।।17।।

विशिखैः प्रखरैरचिक्षपत् स सहस्राणि चतुर्दश द्विषाम् ।
कुणपैः परिपाटयन् क्षितिम्, नभ उत्कृत्त शिरोभुजादिभिः ।।18।।

अथ सूर्पणखा स्वबान्धवान्, लुठितान् प्रेक्ष्य भुवस्तले मृतान्।
अगमन्निजशत्रुरावणं, सुहृदं क्षुब्धवती विराविणी ।।19।।

भगिनीमुपलभ्य विक्लवाम्, जनसंस्थानकथां निशम्य ताम् ।
चिखिदे हृदिं नाल्पतो बली, गृहमेनां परितोष्य चाविशत् ।।20।।

युवजानिरसौ नृपो यदि, युधि संजित्य हरे वराङ्गनाम् ।
भवभारजिहीर्षुरच्युतो, ह्यवतीर्णो यदि तत्तराण्यलम् ।।21।।

इति नाम विचार्य जानकीहरणार्थे कृतवान् मतिं दृढाम् ।
अवबुध्य विभात एव चच्छलिमारीचमुपागमद् रथी ।।22।।

हिरण्मयो मृगो भूत्वा कुट्या रामापनोदने ।
प्रार्थयामास साहाय्यं, सीताहरणसिद्धये ।।23।।

अमुना प्रतिबोधितोरुषा, हननीयोऽसि विभीषिकां ददौ ।
उभयत्र वधं विलोकयन् सह तेन प्रचचाल काननम् ।।24।।

त्वचि दाशरथि प्रियार्थितम्, मृगयुं नाम निनाय दूरतः ।
कलधौतमृगश्छलन् खलो, म्रियमाणो विरराम लक्ष्मण ।।25।।

विपदापतितं विदेहजा, कलयित्वा पतिमाह देवरम् ।
व्रज कायति तेऽग्रजो वने, व्यसनं घोरममुष्य लक्षये ।।26।।

प्रतिबोधनमस्य सा यदा, स्वनियोगावमतिं स्म मन्यते ।
बहुविद्धतया स मर्मसु, चलितो रामरिरक्षिषुर्यतिः ।।27।।

दिविजा दिगरण्यपालका, विहगाः काननजीवजातयः ।
रघुवीरवधूमरक्षितामवतैनामिति यास्यताऽदितम् ।।28।।

विजने कलयन् विदेहजाम्, कृतभिक्षाचरवेशरावणः ।
गृहपालइवाविशन् भयादयि भिक्षां क्षिप तामभाषत ।।29।।

स जुगुप्सितवाक् सतीममूम्, सहसाव्यंञ्जितलिङ्गकैतवः ।
सभयां विनिपात्य वाहने, प्रतिचस्कन्द विहायसा दरन् ।।30।।

रघुनन्दन जीवितेश्वर, गुरुसेवाचण वीरदेवर ।
स्वजनं परिपातमापदः कुररीव स्म विरौति साऽध्वनि ॥31॥

रुदतीं बुबुधे रघुस्नुषाम् स जटायुर्विपिने सखा प्रभोः ।
अवितुं जनकात्मजां जरन्, कृतयत्नः पतितो विपक्षतिः ॥32॥

प्रति पर्वतमस्तके कपीन्, पटमुत्क्षिप्य जगाम जानकी ।
स्वपुरीमधिगत्य रावणः, पिदधेऽशोकवने विषादिताम् ॥33॥

अनुनयैर्विनयैरथ लोभनैः,
प्रणयदर्शनभीषण तर्जनैः ।
अनुक एष मनोरथसाधने,
नहि शशाक तृणाय मतोऽनया ॥34॥

मूर्तिमती तपस्येव, ध्यायन्ती रामविग्रहम् ।
जपन्ती राम रामेति, सीता रक्षोवनेऽवसत् ॥35॥

इति तृतीयः सर्गः ।

चतुर्थः सर्गः

अनिच्छन्नाश्रमे त्यक्त्वा सीतामनन्य रक्षिताम् ।
आजगाहे वनं खिन्नो लक्ष्मणो भ्रातृवत्सलः ॥1॥

कपटेन मृगं हिरण्मयम्, रचितात्मानममुं निपात्य सः ।
पथि पञ्चवटीं व्रजन् लघुम्, चिखिदे प्रेक्ष्य पतिव्रतां प्रति ॥2॥

उटजं सहधर्मिणीं विना, हृदि शल्येन समीक्ष्य विव्यथे ।
सह लक्ष्मण उच्चचाल ताम्, प्रविचिन्वन् निपुणं यतस्ततः ॥3॥

अजनौ सुहृदं जटायुषम्, क्षतपक्षं व्यथमानचेतनम् ।
उदिताखिलवृत्तमुद्गतम्, पितृवत् प्रेतकृतैरपूपुजत् ॥4॥

स कबन्धतमीचरं व्रजन् शमयित्वाऽऽप वनान्तरं बली ।
कृपया शबरीं कुटीमितः कृतकृत्यां कृतवानधोक्षजः ॥5॥

बदराणि मधूनि भक्षयन् मुमुदे भावबुभुक्षितो हरिः ।
अवरः प्रवरो न मानुषो जनुषा राममते कदाचन ॥6॥

अमुया कपिराजसंश्रिताम् कृतवार्तामभिनन्द्य राघवः ।
प्रतिपूज्य मनस्विनीममूम् क्षितिजान्वेषणतत्परो भ्रमन् ॥7॥

नततामरसां मधुव्रतैः कलकादम्बपिकादिकूजिताम् ।
सरसीं ऋषजातिसद्गृहम् प्रतिपन्नोऽनवकेशिपादपाम् ॥8॥

विललाप हताशचेतसा, मिथुनैर्नादितफुल्लकानने ।
अयि बोधथ मैथिली मम, कुह मृग्यो मधुपाः खगा गता ॥9॥

अयि लक्ष्मण रामणीयकम्, मम जातं नितराममङ्गलम् ।
प्रतिदर्शय मामनिन्दिताम्, तनयां दुर्ललितां महात्मनः ॥10॥

जननीं वद किं मनस्विनीम्, प्रतिवक्ष्ये पुरि तां विना गतः ।
रघुवंशकुलश्रिया सममपि कीर्तिर्द्विषतां हृता मम ॥11॥

अनुजः प्रतिबोधनं गुरोः, परितोषं विविधं प्रियोऽकरोत् ।
सहजं किल सौहृदं तयोर्ववृधे नैकगुणं नवापदि ॥12॥

ऋष्यमूकगिरिं भ्रातुः संत्रस्तः सचिवैः सह ।
सुग्रीवोऽध्यवसद् रामौ भेजे प्रेक्ष्य भियं पराम् ॥13॥

प्रहितः पवनात्मजः सुधीः, कपिराजेन रघूत्तमौ प्रति ।
गुणवान् बलवान् विचक्षणो, नरसिंहावमिलद् वटूत्तमः ॥14॥

प्रभुणा कथिता कथा निजा, स च सुग्रीवकथामवर्णयत् ।
चरणावभिवाद्य शार्ङ्गिणः, सुहृदौ स्कन्धकृतावुवाह सः ॥15॥

रघुनाथसुकण्ठसौहृदम्, स हनूमान् कृतवह्निसाक्षिकम् ।
प्रचकार दृढव्रतो दृढम्, समदुःखौ सुहृदौ ननन्दतुः ॥16॥

स विदेहनृपस्य नन्दिनीम्, निपुणं चेतुमदात् प्रतिश्रुतिम् ।
समदर्शयदस्य भूषणम्, प्रतिमुक्तं रमया कपीश्वरः ॥17॥

न्यदधाद् हृदि भूषणं प्रभुर्व्यथमानो सहधर्मिणीकृते ।
बहुधा सुहृदा च सान्त्वितः, प्रतिपद्यच्छ शुचं तदीयकाम् ॥18॥

मम सोदरवालिनो भयाद्, हृतभार्योऽस्मि गिरौ प्रवर्षणे ।
इह शापभयान्न यात्यसौ, वसतिस्तेन कृताऽद्रिसानुषु ॥19॥

अथ दुन्दुभिराक्षसास्थिभिः, सह शालान् विशिखेन विध्यता ।
बलिवालिवधे प्रतीतताम्, सृजता मित्रममत्वमर्जितम् ॥20॥

अभयं तव वालिनोऽस्तु स, विशिखेनैव हनिष्यते मया ।
इति रामवचांसि शृण्वता, कपिराजेन मुदा प्रफुल्लितम् ॥21॥

सहराम इयाय वालिनम्, शुभकंठो युध आजुहाव तम् ।
युधि लीनममुं स पत्रिणा, हतवान् दाशरथिः सखिडिषम् ॥22॥

भगिनीमनुजस्त्रियं स्नुषाम्, प्रति पापो हननीय एव रे ।
इति कूटवधस्य निन्दकः, कटुजल्पी शमितोऽसुरारिणा ॥23॥

मदनूनगुणं सवर्चसम्, भगवन् पाहि शिशुं कृपास्पदम् ।
सुतमङ्गदमक्षिकोरकमिति यास्यन् हरये समार्पिपत् ॥24॥

अभिषेच्य तदा हरीश्वरम्, सुहृदं लक्ष्मणपाणिना पुरे ।
युवराजपदे किलाङ्गदम्, रघुनाथः कृपया न्यवेशयत् ॥25॥

इति धन्विवरो दृढव्रतः, सहबन्धुः प्रतिपालयन् घनान् ।
अधिपर्वतमस्तकं सुधीः, समवात्सीत् सुगुहानिकेतने ॥26॥

चपला विललास गर्जिते, कलकेकां प्रचलाकिनो ददुः ।
अनिलः सहिमः सशाद्वला, वसुधात्री जलपूरपूरिता ॥27॥

प्लवगाः स्म रटन्ति सर्वतः, कलसंगीतकृतोऽद्रिनिर्झरा ।
बहुकीटपतङ्गजन्मभूर्निबिडध्वान्तदिनो बभावृतुः ॥28॥

वैदेह्या विप्रहीणस्य वार्षिकी रमणीयता ।
जज्ञे शोककरी तस्य रामचन्द्रस्य शोचतः ॥29॥

इति प्रावृट्काले विरहविधुरो लक्ष्मणगुरु-
र्गुहायां कभ्रायां विहितवसतिः प्राप शरदम् ।
सुकण्ठः सीताया विचयविषये विस्मृतवचाः,
समाकारि भ्रात्रा तदनु कुपितेनेव सविधम् ॥30॥

इति चतुर्थः सर्गः

पञ्चमः सर्गः

प्राप्तं हरीश्वरं रामः सुग्रीवं व्रीडयान्वितम् ।
सीतान्वेषणसम्बन्धे प्रेरयामास कृत्यवित् ।।1।।

सलिलापगमं विलोक्य स, कपिराजो रघुराजचोदितः ।
व्यसृजन्मिथिलेशनन्दिनीविचयार्थाय कपीन् समन्ततः ।।2।।

रघुनायकदत्तमुद्रिका, जगृहे वायुसुतेन धीमता ।
प्रणिपातपुरस्सरं तदा, ककुभं प्रास्थित दक्षिणां चरैः ।।3।।

जडिमातपवातपोडिताः, सहमाना लवणाब्धिमाययुः ।
इह चाह जटायुषोऽग्रजो, गिरिकुक्षेः सहसा समागतः ।।4।।

रघुराजवधूर्विराजिता, ह्यधिलंकावनिकं मयेक्ष्यते ।
जलधिं तरतीह यो बली, स समीक्षेत तपस्विनीमिमाम् ।।5।।

इति गृध्रवचो निशम्य स, गुरुणा जाम्बवता प्रचेतितः ।
पवनस्य सुतो महाबली, प्रचचालाब्धितितीर्षया गजन् ।।6।।

सुरसामहिमातरं पथि, पथरोधं रजनीचरं तथा ।
मतिशक्तिबलेन वर्जयन्, विललङ्घेऽम्बुनिधिं श्रमं विना ।।7।।

नगरं विविशन् स लङ्किनीं, शमयन् मुष्टिहतां विभीषणाम् ।
मिलितः सदशोकंवाटिकामधिगम्यास्त तरौ घनच्छदे ।।8।।

इह मूर्तिमतीं शुचं कृशाम्, मलिनां खिन्नमुखीं स जानकीम् ।
विदितैरुपपादिलक्षणैरभिजज्ञे रघुवीरगेहिनीम् ।।9।।

किं कर्तव्यविमूढोऽसौ, विचारयन् स्थितो यदा ।
दशग्रीवः समायातो योषिन्मण्डलसंवृतः ।।10।।

विदिताभिगमा भयाकुलाः लघु भेजे तनुवेपथुं सती ।
धनभोगशतैः स नाशकद्, मृदुलां लोभयितुं दृढव्रताम् ।।11।।

तृणमन्तरितं विधाय सा, गुणिनी तं निजगाद राक्षसम् ।
अयि पापपथं जहीहि ते, भविताऽयं प्रलयाय रावण ।।12।।

न शशं द्विरदं गजाङ्गना, भजते मुञ्च मदाश्रितां धियम् ।
धनराज्यविहीनतापसो, मम भर्ता रघुवीर एव सः ।।13।।

न हि कामयितास्म्युपस्थिते, गलभङ्गेऽपि कथञ्चनाधम ।
तृण तिष्ठतु कामनाकथा, न हि सव्येन पदेन मृश्यसे ।।14।।

अवमानपुरस्सरं वचः, स समाकर्ण्य रुषा ज्वलन् कटु ।
वशगा यदि नासि त्रिंशता, दिवसैर्मे नियतो वधस्तव ।।15।।

अभिधाय गते दशानने, रजनीचर्यं इमामभाययन् ।
त्रिजटा प्रतिबोध्य ता गृहम्, गमयित्वा विजने मुमोच ताम् ।16।

निममज्ज सती नवाधिषु, प्रतिचिक्षेप कपिश्च मुद्रिकाम् ।
रघुवीर यशांसि वर्णयन्, प्रतिपन्नो निकषा निमन्त्रितः ।।17।।

जनने रघुनाथमुद्रिकामहमानैषमिमां कृपानिधेः ।
प्रभुदूतमिमं मनुष्व माम्, हनुमन्तं गतभीः समाख्यया ।।18।।

समये च शुचौ घनोदय, इव सीताहृदयस्य सोऽभवत् ।
विरहाकुलरामवेदनाम्, कथयंस्तां विधुरामशीशमत् ।।19।।

दयिते मम वेद मानसम्, स्निहितेर्योगमिमं तमावयोः ।
अनिशं तव चिन्तयाऽऽकुलम्; हृदयं तत् किमितः परं ब्रवै ।।20।।

मम यानि विभान्ति शोभने, रमणीयानि समं त्वया सतः ।
नितरामिह तानि सम्प्रति, विरहान्मे सखि सन्ति तप्तये ।।21।।

मलयानिल एष कोकिलस्वरमाधुर्यमयङ्करश्मयः ।
हिमशीकरपङ्कजावली, मम जाता ज्वलनानुकारिणी ।।22।।

इतिभर्तृपदाब्जषट्पदी, पतिसंदेशमिमं निशम्य सा ।
परगद्गदिकामुपेयुषी, प्रणयक्लिन्नदृशाऽशृणोत् कपिम् ।।23।।

प्रभुरेष्यति वानरैः सममचिराद् रावणमुत्क्षिपन् दिवम् ।
विपदं विगतामवेहि त, इति शान्ता पटुना जहर्ष सा ।।24।।

अनुपृष्टा तदा सीता, हनुमन्तं बुभुक्षितम् ।
अनुमेने फलाहारे ज्ञात्वा बुद्धिबलान्वितम् ।।25।।

अथ माध्वफलानि भक्षयन्, कपिभावेन रुरोज शाखिनः ।
अपि रक्षिजनं प्रमारयन् प्रहितं रावणिमक्षयं तथा ।।26।।

अहिबन्धनबद्ध आविशद्, घननादेन सभां सुरद्विषः ।
अमरारिममुं प्रगल्भवाङ्, न्यगदीद् रामविरोधमुज्झितुम् ।।27।।

कुपितः कपिपुच्छदग्धये, दशमूर्धा निदिदेश राक्षसान् ।
ज्वलनं समवेक्ष्य वानरः, सदनात् सद्म ननर्द विभ्रमन् ।।28।।

प्रबभूव विशङ्कटा विपत्, पुरि हा हेति समन्ततोऽजनि ।
नगरं हतनाथवद् दहन्, शमयिष्यन् श्रममब्धिमापतत् ।।29।।

अभिवाद्य पुनर्विदेहजाम्; तदभिज्ञानमणिं समाददे ।
प्रचलन् प्रजगर्ज भीषणम्, न्यवृतन्मित्रगणं च तर्पयन् ।।30।।

अमितं सुत धारयामि ते, विदितो राम इति स्म शंसति ।
विनतः पवनात्मजो न तद्, निजकृत्यं बहुमन्यते कृती ।।31।।

सुहृदा कृतमन्त्रणः प्रभुः, कटकं दुर्मदऋक्षवानरम् ।
अभियानकृते समादिशन्नधिवेलं रिपुहा न्यवेशयत् ।।32।।

स निवुध्य समागतिं द्विषः, सुरहा मन्त्रितवान् स्वपार्षदैः ।
अमुभिः प्रियवादिभिर्भिया, विजगे माऽत्र भयस्य कारणम् ।33।।

विजितं सचराचरं जगद्, भवताऽखण्डलभूतिरानशे ।
नरवानरसैन्यमोश्वर विहितं नो विघसाय वेधसा ।।34।।

अनुजोऽस्य विभीषणस्तदा, विनयेनाह हितं परामृशन् ।
जहि तात हठं नयं भज, हृतधी मन्त्रिवचो न गृह्यताम् ।।35।।

वलवद्रिपुवैरहापनो, दशकण्ठेन सुमन्त्रविद्विषा ।
प्रहृतश्चरणेन सुव्रतः, शरणं रामपदाब्जमैक्षत ।।36।।

परयोषित आननं नयी, शुभमिच्छुर्विजहातु दूरतः ।
इति तस्य निरूपयन् स्फुट, नभसोड्डीय ननाम राघवम् ।।37।।

पादमूलं रिपोरेवं याते लङ्केश्वरोऽनुजे ।
दर्परोषपरीतात्मा बभाषे यन्तु कातराः ।।38।।

श्रुत्वा वृत्तं मयदनुजजा विह्वला तस्य पत्नी,
दातुं सीतां भुवनपतये याचमाना रुरोद ।
भीतिर्योषाप्रकृतिरिति तां नाभिदध्यौ स साध्वीम्,
मन्दोदर्या विधिविमुखता खिन्नया तस्य मेने ।।39।।

इति पञ्चमः सर्गः

षष्ठः सर्गः

प्रपन्नार्तिहरो रामः प्रपन्नं धर्मशालिनम् ।
लङ्केश्वरपदे मान्ये तत्क्षणादभिषिक्तवान् ।।1।।

विनयेऽम्बुधिनाऽवधीरिते, पथदानाय कृतेऽसुरारिणा ।
प्रचुकोप यदा रघूद्वहो, विनतः सेतुविधिं जगाद् सः ।।2।।

रचकौ नलनीलसंज्ञकौ, गुरुतः, प्रापतुराशिषं शिशू ।
महसा भगवंस्तरिष्यते, तव तत्स्पर्शमवाप्य भूधरैः ।।3।।

पटुकारुकृतेन सेतुना, कृतरामेश्वरमूर्तिरीश्वरः ।
सुखमम्बुनिधिं ततार स, सह सैन्येन सुवेलमावसत् ।।4।।

इह वालिसुतो महारथो; रघुराजात् प्रति रावणं ययौ ।
स नयैः शतधा न्यबोधयन्न च रक्षो हठमात्मनोऽजहात् ।।5।।

बलदर्पममुष्य तर्जयन्, पदमारोपयदात्मनोऽङ्गदः ।
यदि कोऽपि पदं ममोद्धरेत्, तव वीरो भविता रमा तव ।।6।।

न शशाक सभासदो जनो, भटमानी पदचालने मनाक् ।
इति दर्शितभीतिरङ्गदो, न्यवृतद् रामपदाम्बुजं कृती ।।7।।

मयजा दयिता कृशोदरी, बहवश्चान्यजना हितैषिणः ।
बहुधा समबूबुधन् पतिम्, बलदृप्तः स चकार नादरम् ।।8।।

इति युद्धनिवारणे कृतम्, विफलं वीक्ष्य निजोद्यमं विभुः ।
पुररोधनमादिशद् द्विषाम्, तुमुलं जन्यमजीजनद् रिपुः ।।9।।

हनुमद्युवराजलक्ष्मणाः, कपिराड्ऋक्षपतिर्विभीषणः ।
व्यहरन् मृगराजविक्रमाः, समरे प्राणपणेद्विषद्वरैः ।।10।।

दिवसे दिवसे बलं स्वकम्, समरे वीक्ष्य विनष्टीमागतम् ।
घटकर्णमबोधयत् प्रभुर्मदयित्वा व्यसृजद् रणाय तम् ।।11।।

उपलभ्य कथामभूत् सुधीर्जगदम्बाहरणेन खिन्नधीः ।
तदपि स्वनियोगमाचरन्, कृतसंनाहवपुर्गजन् गतः ।।12।।

भीमकायो महायोद्धा, चूर्णयन्नृक्षवानरान् ।
सुग्रीवादीन् पराजित्य ह्रादमानो विचक्रमे ।।13।।

स्वचमूं विकलां निरीक्ष्य स, रघुवीरो धृतकार्मुकः शरैः ।
निशितैर्निचकर्त तद्भुजावनुशीर्षं च कबन्धमच्छिनत् ।।14।।

बलिबन्धुवधेन विह्वलम्, पितरं मेघनिनाद इन्द्रजित् ।
पटुसान्त्वयति स्म रोचयन्, बहुगाथाभिरमुष्य तेजसः ।।15।।

अभिषेणयति स्म रंहसा, समरे श्वो रघुनाथवाहिनीम् ।
कपिभालुकवीथिका लुनन्, युवराजादिभटानतोतुदीत् ।।16।।

अहिपाशगतं रघूत्तमम्, घननादः स चकार हस्तवान् ।
ऋषिनारदचोदितश्च तम्, नरलीलं गरुड़ो व्यमूमुचत् ।।17।।

धर मारय मारयोद्धर, भुजदण्डं तुड मौलिमन्डलम् ।
तुमुले कलहे व्यजायत, तदनु भ्रान्तिकरो महारवः ।।18।।

तदभीष्टसुरप्रभावतो, घननादो विजयं समागमत् ।
खरशक्तिबलेन लक्ष्मणम्, रघुवीरं गहनं व्यमूमुहत् ।।19।।

निममज्ज महोदधौ शुचो, रघुनाथोऽनुजवत्सलो गुरुः ।
पटुवैद्यमतेन मारुतिम्, विससर्जौषधये स उत्तराम् ।।20।।

हतघोरतमीचरः पथि, निदधद् द्रोणगिरिं न्यवर्तत ।
भरतेन शरेण पातितो, विललम्बे पथि मारुतात्मजः ।।21।।

अथ लक्ष्मणलीनिशङ्कया, विललापार्तमना रघूत्तमः ।
रुदितं करुणं निबुध्य तत्, कुलिशग्रावकुलानि दुद्रुवुः ।।22।।

तव बन्धुरिहास्मि विह्वलो. व्यसने यो मुमुचे न कर्हिचित् ।
इह सान्त्वयिता ममास्ति कः, कुपितं वत्स कथं त्वयाऽस्ति मे ।23।

मम दुर्लभसोदरो गतो, हृत भाग्यस्य कृतेऽल्पयोषितः ।
मम गेहगमस्त्वया विना, किमु सौमित्रिगुरोर्भविष्यति ।।24।।

इति भ्रातृकृते स्निग्धं क्रन्दन्तं रघुनन्दनम् ।
दृष्ट्वा श्रुत्वा दलं कृत्स्नं रुरोद द्रुतलोचनम् ।।25।।

सहसैव हनूमता तदा, दधता द्रोणगिरिं समागतम् ।
भिषजा कृतमौषधं क्षणाद्, बुबुधे सुप्त इवोत्थितोऽनुजः ।।26।।

अनुजं दयितं सदग्रजो, मृतलब्धं परिरभ्य नाजहात् ।
कृतिभिर्बुभुजे फलं दृशाम्, कपिऋक्षैः स्निहितिं विलोक्य ताम् ।27

समरेऽथ पुनः प्रवर्तिते, घननादोऽद्य पराजितोऽभवत् ।
यजने स्थितमाह्वयन् वलाद्, युधि शेषो यमलोकमक्षिपत् ।28।।

सुतनिर्दलनस्य वार्तया, दशमूर्धा हृदि चिक्लिशे भृशम् ।
शमयन्नबलाजनं गृहे; रणहेतोरकरोदनीकिनीः ।।29।।

सुरराजरथेन राघवो, रथिनं शत्रुमयुध्यताच्युतः ।
प्रभुरावणयोरिवैव तत्, प्रभुपौलस्त्यमृधं भयानकम् ।।30।।

कपयो जय राम भेलिरेजय दैत्येन्द्र वभाषिरेऽ सुराः ।
इति घोषसमिद्धचेतसः, समयुध्यन्त मिथो महाहवे ।।31।।

दलयोरुभयोः प्रमारणम्, भटसंघट्टननादकश्मलम् ।
क्षतशोणितपूरवाहनम्, ववृते तत्र युगान्तडामरम् ।।32।।

दशकन्धरशाम्बरी रणे, निबिडं ध्वान्तमजीजनद् दिने ।
अपतन्नभसोऽसृजादिकम्, सकृदस्त्रेण जहार तां प्रभुः ।।33।।

सहमारुतिलक्ष्मणाङ्गदम्, कपिराजं युयुधे जयाजयी ।
अनुजस्य जिघांसयाऽमुना, प्रहितास्त्रं प्रभुराददे हृदि ।।34।।

स तदारभतार्चनं महद्, रणचण्ड्या विजिगीषया रिपोः ।
उपलब्धविपक्षचेष्टितः, कपिभीराम इदं व्यचिच्छिदत् ।।35।।

दिवसे दिवसे विलोकयन्, व्ययमानाः पृतना न सोऽत्रसत् ।
धृतनाभिसरोवरामृतो, बहुदा छिन्नशिराश्च नामृत ।।36।।

तदैकेन सुधाकुण्डं शोषयन्नग्निपत्रिणा ।
त्रिशता युगपज्जह्रे रामस्तस्य शिरोभुजम् ।।37।।

निपपात वपुर्महीध्रवत्, कृतभूकम्पमदो रणोन्मदम् ।
क्व स राम इतो हिनस्मि तमिति चीत्कारपुरस्सरं व्यसु ।।38।।

शमिते दशकन्धरे रणे, परितो हर्षतरङ्ग आसरत् ।
वसुधा जयनादपूरिता, मुदितो देवगणो जगौ यशः ।।39।।

मयजा महिषी गुणोत्तमा, करुणं क्रुष्टवती सहाङ्गना ।
अनुजेन विभीषणेन च, निखिला प्रेतकृतिः समापिता ।।40।।

स च राममतेन लक्ष्मणप्रमुखैः राजपदे न्यवेश्यत ।
मुमुदे जनकात्मजा परम्, प्रियवार्तामुपलभ्य मारुतेः ॥41॥

अवनिक्तकृतानुलेपना, कृशगात्री सुचिराद् वियोगिनी ।
मितनम्रमुखी ह्रियान्विता, प्रभुमानायि हनूमताऽनघा ॥42॥

कपिभालुकलोकवन्दिता, प्रभुणा लोककृतेऽपशब्दिता ।
अविशद् गुणिनो हविर्भुजम्, विहितं प्रार्थितलक्ष्मणेन सा ॥43॥

जनुषा परिपूतमैथिली, परिपूता पुनरत्रपावके ।
हुतभुक्कलितप्रसादवज्जगृहे स्वा दयिता विपश्चिता ॥44॥

अमृतक्षरणं दिवश्च्युतम्, मृतभल्लूककुलं च वानरान् ।
प्रभुनुन्नसुरेन्द्रपातितममरारातिहतानजीजिवत् ॥45॥

कपिराजतमीचराधिपावनुजं मारुतिमङ्गदादिकम् ।
शुचिपुष्पकयानवाहितम्, सह नीत्वा चलितः पुरे प्रभुः ॥46॥

दृश्यानि यानि दयिता जनकस्य पुत्री,
रामेङ्गितानि परिपश्यति कौतुकात् स्म ।
तस्याः स्म भान्ति सकलानि नवानि तानि,
कालान्तरं बहुतरं यतनेत्र वृत्त्याः ॥47॥

इति षष्ठः सर्गः

सप्तमः सर्गः

सिन्धुं रामेश्वरं वन्द्यौ सीतायै पथि दर्शयन् ।
पम्पापुर्यां कृतावासः प्रयागं प्राप राघवः ।।1।।

गणितावधये मरुत्सुतम्, भरताय व्यसृजज्जनार्दनः ।
म्रियमाणकृषिर्यथाम्बुना, व्युदफुल्लत् कपिदर्शनेन सः ।।2।।

शिशिरे मधुमास आगतो, मृतदेहे श्वसनं न्यवर्तत ।
अशितं क्षुधयामुमूर्षुणा, दृढतप्तस्तरुमूलमाश्रितः ।।3।।

सति लोचनगोचरे जनाः, सुविमाने तरलायिता मुदा ।
तुतुषुस्ततृपुर्न कौतुकम्, ददृशुर्विस्मृतदेहबुद्धयः ।।4।।

पुलकास्रविहासनिर्भरो, विरहान्ते सुहृदां स संगमः ।
पुरि पुण्यजनानजिह्लदज्जलधि पर्वविधूदयो यथा ।।5।।

प्रथमं भरतस्य मातरम्, नतवान् निर्विकृतिस्तदेतरे ।
कपिराजविभीषणादिकान्, हनुमन्तं जननीरदर्शयत् ।।6।।

भरतेन समं जहौ जटा, मिषतः पञ्चजनस्य संनिधौ ।
परमेण महेन चाविशज्जनिभूमिं महतां महीयसीम् ।।7।।

हर्म्यारूढाः स्म पश्यन्ति गायन्त्यः कोकिलस्वराः ।
पुष्पैर्माङ्गलिकैर्द्रव्यैर्नार्यो राममवाकिरन् ।।8।।

अभिषेकविधिः पुरोधसा, समपादि श्रुतिपारदृश्वना ।
अनुजैर्धृतचामरादिभिः, सहसीतः प्रभुरासने बभौ ।।9।।

पदयोर्निषसाद मारुतिः, सुहृदो भूपतयो ददुर्बलीन् ।
जयतूर्यनिनादमन्त्रभाङ्, नवराजो भुविराम उत्थितः ।।10।।

सचराचरलोक आप्तवानभयं तस्करजाररोगतः ।
समये जलदा ददुर्जलम्, धनधान्यर्द्धिसमृद्धिमान् जनः ॥11॥

अनलानिलतोयजं भयम्, न बभूवास्य जनस्य कुत्रचित् ।
विजितेन्द्रियवृत्तयः प्रजाः, सधवा धर्मपराश्च योषितः ॥12॥

महिषी चिरदुःखभोगिनी, मिथिलाधीशसुताऽमहीयत ।
समयाद् विपुलाज्जगत्सुखम्, बुभुजाते भवनेषु दम्पती ॥13॥

न च कालगतिः सुखं तयोः, कुटिला सोढवती दुरत्यया ।
सहसा नवदुःखवाहिनी, पुनरावर्तत कालयामिनी ॥14॥

दशमूर्धपुरे निवासतो, महिषीशीलमशङ्क्यताबुधैः ।
जनरञ्जनमेव मेनिरे, रघुनाथा निजकर्म भूभुजः ॥15॥

न हि सत्यपरायणाः क्षणाद् विचलन्तीह पथो वरीयसः ।
अमृतं विकिरन्ति देहिनाम्, स्वयमादाय विषं ज्वलद् दहत् ॥16॥

अनुजः समबूबुधद्यदा, कृतकोपो नृप आदिदेश तम् ।
विवशोऽग्रजभक्तलक्ष्मणो, वनवासाय निनाय जानकीम् ॥17॥

दयितो हतभाग्यदेवरो, महिषीं तां परिपन्नवर्गभिणीम् ।
करुणं बहुशो विलापिनीमुपगङ्गातमसं जहौ रुदन् ॥18॥

व्यसनाद् व्यसनं गता सती, हतभाग्येन हता पुनः पुनः ।
सुकुमारतनूः सुखोचिता, वृजिनाल्लोककृताद् विपाटिता ॥19॥

स्मारं स्मारं वनेवासं विह्वला क्षोभरंहसा ।
दुर्जातं नवमापन्नं प्रललाप परिस्फुटम् ॥20॥

तत आदिकविर्महामुनिरधिसंध्यं विचरन् यदृच्छया ।
रुदतीं करुणास्पदं स्त्रियमनुशुश्राव जगाम संनिधौ ॥21॥

गुरुगर्भयुतां विषादिताम् द्रुतचेता अनयत्तपोवनम् ।
बुबुधे जनकात्मजां यदा, सरहस्यं समपीपलद् बुधः ॥22॥

श्वशुरो जनको यथा गुरुः, समरक्षद् रघुवीरगेहिनीम् ।
अचिरात्तनुजौ विदेहजा, कमनीयौ यमलावजीजनत् ॥23॥

विधिना जनिकर्म वर्तयन्, मुनिराचष्ट कुशं लवं शिशू ।
सदृशौ स्वपितुः समूर्जितौ, पुपुषाते मुनिभिः समं मृगैः ॥24॥

यमलौ प्रतिभागुणान्वितौ, सहविद्यार्थिगणातिशायिनौ ।
वरशास्त्रचयं किशोरकौ, सधनुर्वेदमथाधिजग्मतुः ॥25॥

तमसातट एकदा भ्रमन्नृषिवाल्मीकिरवेक्ष्य कामिनोः ।
शबरेषुनिपातितं खगम्, करुणार्द्रः प्रशशाप घातुकम् ॥26॥

* * *
मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥
* * *

वचनं सहजं विनिर्गतम्, हृदयान्मर्महतादनुष्टुभि ।
स च रामकथां मनोहरैः, पदवाक्यैः कृतवानजाज्ञया ॥27॥

चरितं रघुनन्दनस्य तद्, यमलावस्मरतां विचक्षणौ ।
कलकण्ठगलेन वीणया, जगतुः श्रोतृसमाजहारिणौ ॥28॥

दयितां परिवादभीतिमानिति निर्वास्य गृहात् परीक्षिताम् ।
सदने न्यवसच्चरंस्तपो, रघुवीरो वनवासिचर्यया ॥29॥

हतभाग्यतया विसर्जितः, प्रभविष्यन् नृपतिर्वनं तदा ।
कुटिलं विहरन् निजेच्छया, विधिरस्मिन् प्रजहार निष्ठुरम् ।30।

हृदयं भसितं घृणाग्निना, जगदेनद् विपिनायितं वृहत् ।
समदुःखसुखः परं प्रभुर्नयमार्गेण शशास पूर्ववत् ।।31।।

अश्वमेधक्रतुं वीर आरेभे नैमिषे गुरुम् ।
धर्मपत्नीपदे कृत्वा, सीतामूर्ति हिरण्मयीम् ।।32।।

मुनयो गुरवः प्रपेदिरे, क्रतुदेशं व्रतिनस्तपोधनाः ।
अवनीरुहमूलमाश्रिता, उपकार्यामथवा यतस्ततः ।।33।।

परिवारयुतो महाकविर्मुनिवाल्मीकिरपीह संययौ ।
अटतः स्म कुशौ किशोरकौ, नगरं यज्ञपदं मनोरमम् ।।34।।

शुभरामकथां पराद्भुताम्, जगतुः श्रोतृकुले कुशीलवौ ।
मधुरस्वरगीतसौष्ठवाद्, रससिक्तानि मनांसि चक्रतुः ।।35।।

अथ यज्ञपतिर्महायशाः; श्रुतकीर्तिर्यमयोः प्रवीणयोः ।
चकितो रसवित् समाह्वयच्छशिवक्त्रौ रमणौ कुतूहलात् ।36।

तनयाववलोक्य भूमिभृदनवद्यौ वररामणीयकौ ।
शशिकान्त इवाद्रवत् पिता, शशिनं प्रेक्ष्य निसर्गतोऽविदन् ।।37।।

समवेतगलावगायताम्, रचनां तां सुमनोहरां गिराम् ।
सनृपा पटुगानमोहिता, परिषत्तन्मयतामनायि सा ।।38।।

अवतारकथामनुत्तमाम्, जगतुर्जन्मपुरस्सरां हरेः ।
क्रमशो वनवासविक्रमो, नगरावृत्तिमहश्च वर्णितः ।।39।।

दशमूर्धपुरे निवासतो, महिषीशीलमशङ्क्यताबुधैः ।
जनरञ्जनमेव मेनिरे, रघुनाथा निजकर्म भूभुजः ॥40॥

अनुजः समबूबुधद् यदा, कृतकोपो नृप आदिदेश तम् ।
विवशोऽग्रजभक्तलक्ष्मणो, वनवासाय निनाय जानकीम् ॥41॥

दयितो हृतभाग्यदेवरो, महिषीं तां परिपक्वगर्भिणीम् ।
करुणं बहुशो विलापिनीमुपगङ्गातमसं जहौ रुदन् ॥42॥

तत्पर्यन्तकथां गीत्वा विरेमतुः कुशीलवौ ।
नवीकृतवियोगाग्नीरामो विक्लवतां गतः ॥43॥

गृहिणीनिधनाभिशङ्किनमृषिवाल्मीकिरुपेत्य सान्त्वयन् ।
ध्रियते जनकात्मजाऽभ्यधाद्, न्यगदीद् रामसुतौ कुशं लवं ॥44॥

अतिमात्रसमुन्नचक्षुषा, परमोत्फुल्लतनूरुहः पिता ।
प्रणमद्युगलं समानयन्, निजमुत्सङ्गमवाप निर्वृतिम् ॥45॥

नृपयाचनया तदाऽमुना, मुनिनाऽऽनायि धरात्मजा सभाम् ।
अवसन्नमुखीं तपःकृषामवलोक्यावससाद चित्तवान् ॥46॥

दुरितैर्जगतीतलस्य सा, भृशनिर्विण्णमना विदेहजा ।
विवरं धरणीमयाचत, जननीं येन सती भवेन्नृणाम् ॥47॥

अथरत्नमयं सदासनम्, सहसा क्षोणिहृदः समुन्नतम् ।
परमाद्भुतमेतदापतद् धरणीजा धरणौ व्यलीयत ॥48॥

चपलास्फुरितम् सभाजनो, महदाश्चर्यमिदं विलोकयन् ।
किमिदं किमिदं ब्रुवन्नहो, मिथ उद्भ्रान्तमना अवैक्षत ॥49॥

स च दाशरथिः प्रवञ्चितः, करुणं रोषमयं व्यलालपीत् ।
कुह नीतवती धरे प्रियामधमे देहि ममाशु मा चिरम् ॥50॥

विपिनानि दहामि वाक्षणादचलांश्चूर्णयितास्मि सम्प्रति ।
उदधीनपि शोषणं नये, जगदुद्वर्तयितास्मि किल्विषि ॥51॥

ऋषिभिर्मुनिभिर्महात्मभिः, कविना नैकविधं प्रबोधितः ।
शनकैः प्रकृतिस्थतामयाच्च्युतबन्धुर्गतिमैहिकीं स्मरन् ॥52॥

अश्वमेधे समापन्ने मेध्ये बहुसुवर्णके ।
एकपत्नीव्रतो राजा समृद्धे न्यवसद् गृहे ॥53॥

अनुजेष्वनुजात्मजेषु स, कृतसत्ताप्रविभाजनः सुधीः ।
हयमेधशतैरयायजीत्, सततं धर्मपथे नुदन् प्रजाः ॥54॥

निजकार्यपरायणा जना, मदलोभादिविकारवर्जिताः ।
परवित्तकलत्रनिःस्पृहाः, सुखशान्ता न्यवसन् मुदान्विताः ॥55॥

अबलं सबलो न चा तुदद्, व्यवहारः सहयोगमाश्रितः ।
परमार्थनिजार्थयोर्भिदा, गलिता रामसुशासने नृणाम् ॥56॥

लवणासुरनामदुर्हृदम्, मधुपुर्यां रिपुसूदनोऽवधीत् ।
स च तक्षशिलामतिष्ठपद्, भरतो *गाथककोटिघातकः ॥57॥

इति रुद्रसहस्रसंख्यका, ऋतुराजा वियुः प्रशासत ।
रघुवंशशिरोमणेर्हरेरवनीभारजिहीर्षुचेतसः ॥58॥

अवधिप्रसमाप्तिसूचनाकरकालो मुनिवेश आगमत् ।
प्रभुणा सह संबिभाषिषुश्चरमैकान्तमथाभ्यलालषीत् ॥59॥

---

*गाथकः = गन्धर्वः

अनुजं प्रतिहाररक्षकम्; विनियोज्याकथयन्नराधिपः ।
य इहालपतोस्तृतीयको, भविता नौ स हनिष्यते मया ।।60।।

अथ तत्र समागतो मुनिः, सुलभक्रुत् प्रभुदर्शनातुरः ।
कटुशापभयातुरोऽनुजः, प्रभुमायात् कुलसंरिरक्षिषुः ।।61।।

प्रियबन्धुजनो बहिष्कृतो, हत एवास्ति मनीषिणां मते ।
इति रामनिरस्तलक्ष्मणः, सरयूरोधसि योगमाश्रयत् ।।62।।

निजधामयियासुमच्युतम्, पुरलोका अनु जग्मुरापगाम् ।
सलिले कृतमज्जनाः समम्, प्रभुणा धाम विकुण्ठमुद्ययुः ।।63।।

इति मानवराजसद्व्रतम्, चरितं लोकहिताय शार्ङ्गिणा ।
क्षपितः खलमूलको भुवः, खरभारः सुजनाश्च नन्दिताः ।।64।।

अथ शून्यतया विरूपिता, नगरी रामपदैरलङ्कृता ।
रघुराजकुशेन वासिता, कुलधानी रविवंशभूभुजाम् ।।65।।

अनेहसि बहौ वीते शाखैका कुशसन्ततेः ।
जयपुरेऽवसत् सुष्ठु चित्तूरे च लवस्य सा ।।66।।

चित्तूरान्निर्गतः कश्चिन्महाराष्ट्रेऽवसद् बली ।
जातो यस्य कुले वीरः शिवाख्यो दक्षिणेश्वरः ।।67।।

जानकीरामयोरेवं तेजसा भारतस्य मृत् ।
पुण्येन पाविता पुण्या रामोऽत्र रमतेऽमृजि ।।68।।

श्रीरामस्य कथा पुनाति वृजिनात् पुण्येषु युङ्क्ते मनः,
कल्याणं शुचि संतनोति जगतां, सन्मार्गविद्योतिनी।
आयुःकीर्तिकरी श्रुता च रसिकैः श्रद्धावतः श्राविता,
काव्येषु ग्रथिता करोति विशदां, वाणीं कवीनां शुभा ॥69॥

भृत्यलक्ष्मणकृतं रसायनम्,
रामदेवचरितं मनोहरम्।
स्वादु भीमभवरोगभेषजम्;
सेव्यमानमनिशं हितावहम् ॥70॥

लघ्वाकृतिः प्रबन्धोऽयं कर्कर्यामिव सागरः।
मोदायास्तु रसज्ञानां दुह्याद् रामकृपामृतम् ॥71॥

इति सप्तमः सर्गः

इति श्रीरामरसायनम्

ग्रामस्थं रामकुटीमन्दिरम्

साधूनामनुराजमार्गमटतां प्रायेण यत्रागमः,
तीर्थं रामकुटीसमाख्यममलं सेव्यं सदा श्रद्धया।
श्रीवृन्दावनदासपाद्युगलं यत्रास्ति पूजास्पदम्,
शुश्रूषानिरतेन यत्र विदृशा प्राप्तं नवं जीवनम् ॥

पूर्वप्रकाशितानि पुस्तकानि

1.	कालरात्रिः	मूल्यम् 4/- रु.
2.	राष्ट्रदर्पणः	,, 6/- रु.
3.	विज्ञानगीतम् (हरियाणा-साहित्य-अकादमी द्वारा पुरस्कृतम्)	,, 6/- रु.
4.	कुटुम्बिनी (हरियाणा-साहित्य-अकादमी द्वारा पुरस्कृतम्)	,, 6/- रु.
5.	पद्यपुष्पवाटिका (हरियाणा-साहित्य-अकादमी द्वारा पुरस्कृतम्)	,, 6/- रु.
6.	धातुविवर्तः	,, 10/- रु.
7.	कालचक्रम्	,, 10/- रु.

पुस्तकप्राप्तिस्थानम्
लछमनसिंहः अग्रवाल;
54/1, सिहीद्वारम्
बल्लबगढ़म्,
मण्डलम् - फरीदाबादम्–121004

बादशाह प्रिंटिंग प्रैस, सीही गेट, बल्लबगढ़